✧˖°*❋ ❋*°˖✧

# नव दुर्गा स्तोत्रम्

# Nava Durga Stotram

✧˖°*❋ ❋*°˖✧

# ॥ नव दुर्गा स्तोत्रम् ॥

**गणेशः**
हरिद्राभंचतुर्वादु हारिद्रवसनंविभुम् ।
पाशांकुशधरं दैवंमोदकंदंतमेव च ॥

**देवी शैलपुत्री**
वंदे वांछितलाभाय चंद्रार्धकृतशेखरां।
वृषारूढां शूलधरां शैलपुत्री यशस्विनीम् ॥

**देवी ब्रह्मचारिणी**
दधाना करपद्माभ्यामक्षमाला कमंडलू ।
देवी प्रसीदतु मयि ब्रह्मचारिण्यनुत्तमा ॥

**देवी चंद्रघंटेति**
पिंडजप्रवरारूढा चंदकोपास्त्रकैर्युता ।
प्रसादं तनुते मह्यं चंद्रघंटेति विश्रुता ॥

**देवी कूष्मांडा**
सुरासंपूर्णकलशं रुधिराप्लुतमेव च ।
दधाना हस्तपद्माभ्यां कूष्मांडा शुभदास्तु मे ॥

**देवी स्कंदमाता**
सिंहासनगता नित्यं पद्माश्रितकरद्वया ।
शुभदास्तु सदा देवी स्कंदमाता यशस्विनी ॥

**देवी कात्यायणी**
चंद्रहासोज्ज्वलकरा शार्दूलवरवाहना ।
कात्यायनी शुभं दद्यादेवी दानवघातिनी ॥

## देवी कालरात्रि

एकवेणी जपाकर्णपूर नग्रा खरास्थिता ।
लंबोष्ठी कर्णिकाकर्णी तैलाभ्यक्तशरीरिणी ॥

वामपादोल्लसल्लोहलताकंटकभूषणा ।
वर्धनमूर्ध्वजा कृष्णा कालरात्रिर्भयंकरी ॥

## देवी महागौरी

श्वेते वृषे समारूढा श्वेतांबरधरा शुचिः ।
महागौरी शुभं दद्यान्महादेवप्रमोददा ॥

## देवी सिद्धिदात्रि

सिद्धगंधर्वयक्षाद्यैरसुरैरमरैरपि ।
सेव्यमाना सदा भूयात् सिद्धिदा सिद्धिदायिनी ॥

✧˳·˖✶*❋ ❋*✶˖·˳✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net